N. A.
Kapil gītā
कपिल गीता
sanskrit
Paper — Handwritten
N. A. (very old)
20 folio
10.7" x 5.5"
Incomplete

पंचस्थानेदपंचनामंतरीक्षतया॥८॥पंचविंशतपेचकानितारकाभ्यंतरेष्वपि॥
एतेचापितुतदार्द्धशवं स्मृत्वागुरोर्मुखात॥९॥नतस्यपुनरावृत्तिर्जन्मसंसारम
गेद्धरेत॥निजमोक्षार्थेसंसिद्धिवंधमोक्षार्थदेस्रुभे॥१०॥इतिश्रीपद्मपुरा
णे॥तारकाष्टकेकपिलगीतायांप्रथमोध्यायः॥१॥तारकेदंडकेचैवकुंडल्या
मर्द्धचंद्रके॥पंचमेविंदुसंकाशंपंचब्रह्मसनातनं॥१॥ब्रह्माविस्नुश्वरुद्रश्च
रूपवान॥२॥त्रिकूटंश्रीहठस्थानेगोल्लाटंओठपिंके॥गुरापादिभ्रामरीजुफ ठ इ
ब्रह्मरंध्रारापन्नकेमात्र॥३॥आकारंपउकारंचमकारंचत्रिमात्रकं॥ईका
रंचैवयेंकारंमात्रकापंचसंज्ञितं॥४॥वैखरीमध्यमावाचापश्यंतिचत॥
थापरा॥पराश्वराचविज्ञेयावाचापंचकसंज्ञितं॥५॥अध्यः स्वल्पमर्द्ध स्म॥

न्यं सर्वं शून्यं च मध्यगं ॥ अगोचरं चतुर्थं च पंचमं च निरामयं ॥५॥ जाग्रत्स्व
प्नसुषुप्तिश्च तुर्यावस्था च उन्मनी ॥ सरावसहजावस्था पंचावस्था प्रकीर्तिता ॥६॥
स्थूलसूक्ष्मकारणं च महाकारणकं परं ॥ कैवल्यं ज्ञानदेहं च पंचदेहः प्रकीर्ति
तः ॥७॥ मात्रा त्रिभेदतः प्रोक्ता द्विमात्रा ऽर्द्धसंज्ञिता ॥ ऋग्वेदोथ यजुर्वेदः सा
मवेदोथर्ववेदाः ॥८॥ सूक्ष्मवेदो हि अध्यात्मो पंचवेदप्रतिष्ठितं ॥ रजसत्वं त
मश्चैव शुद्धसत्वं चतुर्थकं ॥९॥ निर्गुणं सगुणातीतं पंचमं तु प्रतिष्ठितं ॥ रक्त
श्वेतं तथा श्यामं नीलं सुनीलपंकजं ॥१०॥ पंचमं शुद्धपीतं च तस्यांते श्वेत
सोज्ज्वलं ॥ पृथिव्यापस्तथा तेजो वायुराकाशमेव च पंचभूतानि कीर्त्यंते पंच
भूतेषु निश्चितं ॥ सृजनं पालनं चैव प्रलयं च तृतीयकं ॥११॥ सूर्यक्रिया च

द्रक्रियाक्रियापंचकसंज्ञितं ।। पूर्वेंद्रपश्चिमदिशावरुणः प्रसिद्धं यमश्च द
क्षिणादिशोत्तरादिक्कुबेरः ।। ऊर्द्धदिपद्मजन्माएवंदिशार्थप्रतिदैवतंपंचकेन ।।
१३ ।। नैऋत्यकोणनिरृति श्च समीर कोणमाग्नेयकोणप्रतिदैवतचा-
ग्निदेवं ।। वायव्यकोणमधिदैवतवायुदेवमघोदिशायमपिदैवतवि
द्युमुखं सद्योजातं वामदेवायदैवतत्पुरुषायइतिईशानमेव अघोरेभ्यो
थघोरेभ्यः इतिब्रह्मऋषिईशानपंचवक्त्रंपुरस्तात ।। १४ नीरापईदृशं तंयथ
स्थूलभागं अंगुष्ठमात्रं हिप्रमाणलिंगं ।। पर्वार्द्धमात्रं मसुरःप्रमाणंप्रमा
णाहीनेन भवेत्प्रमाणं पद्मकरक्तपीतं तथाश्वेतवर्णकहरस्यामवर्णमि
श्रतं ।। नीलं सुनीलं शुद्धपीतं सुशुभ्रं तथापंचकपीतंवर्णपुरस्तात ।। १५ ।।

सि.गी. खेचरी भूचरी चैव चाचरी च अगोचरी ॥ उन्मनी चेति विख्याता पंचमुद्राः प्र-
कीर्तिताः ॥ १६ ॥ परा मध्यमा पश्यन्ती वैखरी नी च पंचमी चात्मभाषिणी ॥ प्रा-
णो वायुः प्रबोधी च पंच जो पादिमुद्रया ॥ १७ ॥ उर्मी चैवापि सूर्मी च ज्यो-
तिर्ज्वाला चतुष्कला ॥ कलातीत कलाप्राकाः पंचमं सुप्रतिष्ठितं ॥ १८ ॥ पि-
पीलिका विहंगो मर्कटो मीनकं ॥ शब्दमार्गो हि संख्यायां पंचमा-
र्गः पुरातनः ॥ १९ ॥ घटाकाश मठाकाश महदाकाश संज्ञिते ॥ चिदाकाशं नि-
राकारं महाकाशं पंचमं स्थितं ॥ २० ॥ नेत्रं कंठो हृदयं मूर्ध्नि स्थानान्यनु-
क्रमात् ॥ शिखायां पंचमं स्थानं पंच स्थानं प्रकीर्तितं ॥ २१ ॥ सप्तकैला-
सवैकुंठमाश्रयं हि चतुर्थकं ॥ निराश्रयं पंचमं च पंच लोकप्रकीर्तितं ॥
२२ ॥ विश्वस्तैजसः प्राज्ञो प्रत्यगात्मा भिमानिनः ॥ निरंजनस्तदाती

तोसाभिमानीस्तु पंचमं ॥२३॥ तंत्रीवीणाविततत्वसमस्तु दंशघनकांस्यदं ॥ सु
स्वरं च शतातालादैन्हितेवाद्यपंचकं ॥२४॥ गायत्रीप्रथमं पादं द्वितीयं च तृ
तीयकं ॥ चतुर्थं पादमोंकारं पंचमं परमार्थकं ॥ गुरो शंभास्करं विष्णुं रुद्रश
क्तिं च शाश्वतं ॥ वदमार्गेषु पूज्यंते पंचायतननदैवतं ॥२६॥ क्रियाशक्तिर्ज्ञान
शक्तिरिच्छाशक्तिस्तथैव च ॥ मायाशक्तिरनादिश्चशक्तिः पंचविधास्मृताः
॥२७॥ तारं चैवाक्षरं चैव कूटस्थं चात्मनिर्णयं ब्रह्मनरं पंचमं प्रोक्तं विचारः पंच
निर्णयः ॥२८॥ वाडवाग्निश्च पंचाग्निमुदराग्निस्तथैव च ॥ शोकाग्निश्चाप्यकाल्पि
माग्निब्रह्माग्निः पंचसंस्थितं ॥२९॥ विषयानंदयोगाख्यमद्वैतानंदसंज्ञि
तं ॥ विदेहानंदविख्यातं ब्रह्मानंदेति पंचमं ॥३०॥ नामांतादीसापरमार्थ

निष्कामस्त्वं च न त्वमस्य कोहं शिवोहं॥ शिवोहमस्मीति शिवं विचिंत्य स्वनाम
के.गी योहं परिपूर्णोस्म्यहं॥२१॥ इति श्रीपद्मपुराणे पंचविंशदाख्यकपिलगीता
यां द्वितीयोध्यायः॥२॥ श्रीपार्वत्युवाच॥ कलौ काले जगन्नाथ काशीपर्यं
हि प्राणिनां॥ उपदेशकथं तेषां तन्मे ब्रूहि महेश्वरः॥१॥ श्रीईश्वर उवाच॥ ॐ
कारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः॥ एतन्मध्यस्थितं तत्त्वं दर्शयेति जग
द्गुरु॥२॥ ॐमित्येकाक्षरं ब्रह्म सर्वतत्वानुग्राहकं॥ आब्रह्मस्तंबपर्यंतं स
र्वानुग्रहकारणं प्रथमं तारकं ब्रह्म द्वितीयं ब्रह्म दंडकं॥३॥ तृतीयं कुंडलं
ब्रह्म चतुर्थं अर्धचंद्रकं॥ पंचमं बिंदु ब्रह्मैव प्रणावं पंच ब्रह्मभिः॥४॥ वे
दगर्भ समुद्भूतं तं देवो यं निरंजनः तारकं च भवेद्ब्रह्मा दंडकं विष्णुरुच्य के.गी
ते॥५॥ कुंडलन्या द्वितपा रुद्रो अर्धचंद्रः स ईश्वरः॥ बिंदुः सदाशिवः साक्षा

तत्प्रणवः पंचदेवता ॥६॥ निरंजनस्तदातीतः उत्पत्तिस्थितिकारणं ॥ ब्र
ह्मणः त्रिकुटिस्थानमकाराक्षरसंज्ञितं ॥ ७ ॥ वाग्वैखरीमवस्थायां जाग्र
त्तीस्थूलदेहकं ॥ ह्रस्वमात्रा त्रिऋग्वेदो रजोगुणप्रकीर्तितः ॥ ८ ॥ रक्ता
रकं विज्ञेयं रक्तपंकजमध्यगं ॥ विष्णुनाम्नि हृत्स्थानमकाराक्षरसंज्ञितं ॥ ९ ॥
दीर्घमात्रा मध्यमा वाक् लिंगदेहस्तथैव च ॥ स्वप्नावस्था यजुर्वेदो गुणास
त्त्वप्रकीर्तितः ॥ १० ॥ एतद्वंडकं विज्ञेयं श्वेतपंकजमध्यगं ॥ रुद्रस्य स्थानगो
ल्लाटमकाराक्षरसंज्ञितं ॥ ११ ॥ प्लुतमात्रा हि वक्तव्यं तमोगुणप्रकीर्तितः कार
णं देहसंप्रोक्तं पश्यन्ति वाक्प्रतिष्ठितं ॥ १२ ॥ सुषुप्त्यवस्थया प्रोक्तं सामवेदस्तथैव च
रक्तकुंडलं विज्ञेयं श्यामपंकजमध्यगं ॥ १३ ॥ सोमेश्वरपदस्थानं ह्यौंट

हे

पीठं मि निशीतं॥ तुरायगिर्यम्र ई मात्र परावाच्चासंदेवहा॥१४॥ तुर्या
वस्यातत्पादेह महाकारणमुच्यते॥ अथर्ववेदसंयुक्ते देवतंईश्वरंम
हत्॥१५॥ अर्द्धं द्वितीयमिदं प्रोक्तं नीलीवनीलपंकजं॥ सदाशिवश्च स्थाने
चभ्रमतोरुफयाभिधा॥१६॥ परात्पर सूक्ष्मवेदैके वसंतानदेहके॥
रत्नाद्वितीयमितिप्रोक्तं पीतपंकजमध्यगं॥ तारकं केचभवेद्भूमिदंड
कंजलमुच्यते॥१८॥ कुंडलं च न पातेजो ग्राह्यं च बंध्रमासते बिंदुश्चे
वत्पाकाशं प्रणवं पंचमस्तभिः॥१९॥ सत्त्वस्थितिं प्रम्हजत्वं स्थिये च
ज्ञात्मतेजस॥ तारकं च भवेत्सर्वं दंडकं पश्चिमस्तथा॥२०॥ कुंडले
दक्षिरोमोजोत्ताईवेद्रसमोतरं॥ बिंदूर्ध्वे स्वदिशा प्रोक्ता प्रणवं पं

चाभिर्दिशः॥२१॥एतद्देवद्विपात्मानं विज्ञाते सविचक्षणः नैरृत्यं तारकाकारं
ईशान्यं दंडकोच्यते॥२२॥कुंडल्योग्निमिथिद्वैववायव्यमर्द्धचंद्रकं॥विंदुस्त्वा
घोदिशाप्रोक्ताप्रणवंपंचभिर्दिशं॥२३॥सर्वाकारमितिस्तुच्यते सर्वगः सर्वतोमुः
खं॥तारकं सद्योजातोयवामदेवायदंडकं॥२४॥कुंडल्योतत्पुरुषायईशानं मर्द्ध
र्द्धचंद्रकं॥अघोरेभ्यो विंदुमितिप्रणवं पंचभिर्मुखैः॥२५॥विश्वावस्थासमा
हत्यविश्वभोगपरायणाः॥तारकं च ऋग्वेदोयं यजुर्वेदोहिदंडकं॥कुंडलं
सामवेदोयं अर्द्धचंद्रोस्त्वथर्वणः॥विंदुस्त्वसत्यमवेदोयं प्रणवोवेदवीजकं॥
ह्रस्वं च अक्षरो देवकूटस्थोत्तेचदैत्तकं॥अघः स्वन्यं तारकं च ऊर्द्ध स्वन्यं च
दंडकं॥२७॥कुंडलं मध्यमं स्वमं च सर्वस्मापार्द्धचंद्रकं॥विंदुस्त्वेव महास्वप्नं

प्रणवे विश्वतोमुखं ॥१८॥ अत्यातीतोपसत्परो अक्षरं ब्रह्म उच्यते ॥ प्रणवे
पररूपोयेकारणां ब्रह्मधारणाम् ॥ एकं ब्रह्मात्मकं कांशवर्द्धनायजगोत्स्वं ॥
प्रथमे तारकं ब्रह्म द्वितीयं दंड ब्रह्मकं ॥२०॥ तृतीये कुंडलाकारं चतुर्थ्यां
ईचंद्रकं ॥ पंचमे बिंदु संकाशं प्रणवे अर्धरूपकं ॥२१॥ अव्ययं तं ब्रह्मा अ
सहजाव्यक्तरूपकं ॥ अव्यक्तमभवाकाशमाकाशमारुतस्तथा ॥२२॥ मारुते
जायते तेतेजसापस्तथैव च ॥ आपस्य जायते पृथ्वी पृथ्वी विश्वं च जायते ॥२३॥
विश्वं तं ब्रह्मज्ञातव्योसाहरोजाहरेमिमं ॥ एवं ब्रह्मजगत्साप्तमज्ञानेपश्च
मानवः ॥२४॥ संज्ञातासर्वमायायीसवाह्याभ्यंतरेस्थितः इत्यत्ताएषपरंब्र
ह्म अखंडमप्रत्ययस्थितं ॥२५॥ एतावदीक्षितालोकासर्वसंदेहवर्जिता ॥ दी

स्थिता च ब्रह्मरूपा येन ज्ञात्वा व्यवस्थिताः ॥३७॥ ईदृश्यतादृशी आत्मानं सर्वं ब्रह्म
सनातनः ॥ पार्वत्युवाच ॥ कथं मात्रा कथं देवो कथं वर्णान् वद प्रभो ॥ पृथक्
पृथक् मातृका यां के वर्णाः प्रतितिष्ठिताः ॥ ईश्वर उवाच ॥ तारकं मस्तलभतस्य
अकाराख्यं च भावयेत ब्रह्माणं रैवतं ज्ञात्वा रक्तवर्णं विराजितं ॥ पृथक्वर्णं
तत्पादे विरक्तपीतं सुशोभितं ॥३८॥ द्वयं च चार्द्धहस्तं च प्रमाणं देहलक्षणं ॥
द्वितीयं दंडकं ज्ञात्वा उकाराख्यं च मातृका ॥३९॥ विष्णुदैवतमाख्यातं श्वेत
वर्णं विराजितं ॥ पृथग्वर्णं तत्पादे विश्वेतं कपरिराजितं ॥४०॥ अग्रे अर्द्धपर्वह
स्तं च प्रमाणं देहलक्षणं ॥ तृतीयं चैव कुंडल्यं मकाराख्यं च मातृका ॥४१॥ रुद्र
दैवतमाख्यातं श्यामवर्णं विराजितं ॥ पृथक्वर्णं पंकजे च राजते पंचभौतिके ॥
४२॥ ते वर्णाः श्यामगर्भस्थं ज्ञातव्यं च मनीषिणाः ॥ पर्वार्द्धं च स्वहस्तं च प्रमाणं दे

हृल्लक्षणं ॥ चतुर्थं शृद्धं चैवं चइकाराख्यं चमात्रमा ॥ ईश्वरं दैवतं ज्ञात्वा नी-
लवर्णं विराजितं ॥ पञ्चकृवर्णंतत् तीयं च नीलं च सुनीलं तपा ॥ ४२ ॥ पीतं तृ
तीयं वर्णं च शुद्धं श्वेत चतुर्थकं ॥ नीलगर्भस्य मध्यस्थं वर्णत्रयमुदाहृतं ॥
४३ ॥ मसुरमात्रप्रमाणं च शोभितं देहलक्षणं ॥ पंचमं विंदुसंकाशं मकारा
ख्यं च मात्रका ॥ ४४ ॥ देवः सदाशिवो ज्ञात्वा पीतवर्णमनुक्रमात पश्च
ग्वर्णं तु नुत्तत्र शुद्धस्फटिकदीपवत् ॥ ४५ ॥ प्रमाणं न भवेत्यक केवलं
ज्ञानदेहकं ॥ इदं सर्वे शिरो धीते शिखा केवलं राजते ॥ ४६ ॥ पीतं शिखा-
विंदुमात्रं ब्रह्मसायुज्यकारणं ॥ विंदुगर्भस्य मध्यस्थं शुद्धं श्वेतं सलक्ष
णं ॥ ४७ ॥ सोहं मात्रं मुख्यवीजं सर्वांगं गर्भधारिणं ॥ सोहं वीजस्य मध्यस्थं
श्रीरामं परमं महत् ॥ ४८ ॥ सोहं राममिदं ज्ञात्वा श्रुतं ऊर्द्धं न किंचन ॥ श्री

पावत्युवाच ॥ सोहंतारकब्रह्मैवराममंत्रंवदः प्रभो यस्यस्मरणमात्रेण
कृतकृत्योस्मि सर्वदा ॥ ५० ॥ श्रीईश्वरोवाच ॥ नदेयंयस्यकस्यापिप्राणैकंठे
गतैर्यदिदेयंसद्भक्तियुक्तायशांतायसमचेतसः गुरुभक्तिरतोनित्यंवि
रक्तायसमाहितः सत्तिज्ञानविरक्तिस्य हृद्तिष्ठेत्सनातनं ॥ ५२ ॥ तस्या
देयंचवदेवेशिअर्थस्यध्यानप्रकाशवेत् प्रकाशितेचदुष्टेपिनिष्फलंजाय
ते ध्रुवं ॥ ५३ ॥ अथमंत्रंप्रवक्ष्यामिमोक्षदंसर्वदेहिनां ॐहंसतत्त्वंहंससोहं
इत्यादौपाठयेत्सुधी ॥ ५४ ॥ पश्चात्श्रीरामरामायनमः स्वैवाभिनिश्चि
ते एवंचतारकंब्रह्मराममंत्रइतिस्मृते अथमंत्राधिकारस्यसर्वत्रस्यन
संशयः ब्राह्मणोक्षत्रियोवैश्यस्शूद्रोवाअन्यजोपिवा ॥ ५५ ॥ वटदर्श

नादिमार्गेषु अदर्शनात्मस्तथैव च वर्णेषु वर्गहीनेषु चांडा(ला)दिषु॰
निश्चितं ५७ यस्माद्देहे वसेच्छूद्रात तस्माद्देयं प्रभानने मंत्रं देयं प्रय
मतो ह्येवं शुद्धार्थिने तु कं ५८ सप्तकोटि महामंत्रा ह्यसंख्य उपमंत्रकं
एतांश्च सकलान्मंत्राननंतांश्च ब्रवीमहे ५९ सर्वमंत्राधिकं श्रेष्ठं पं
चायतनमंत्रकं ज्ञानं नाधिकतरं रूप्ये विद्याविशिष्यते ६० सर्ववि
द्याधिके हि विविष्णुविद्याविशिष्यते विष्णुविद्याके श्रेष्ठं पंचभवं शिव
विद्यया ६१ पंचभवादधिकं हि विपक्तिविद्याधरास्मृता गणना श्रेष्ठं त
तविद्या श्रेष्ठं तत श्रेष्ठं न संशयः तस्मात्सर्वाधिकविद्या ६२ सर्वविद्याशिरोमा
त्मा श्रीविद्या हि न संशयः तस्मात्सर्वप्रविद्यायां श्रीविद्या शिरसि प्रिये ६३
राजराजेश्वरीविद्या तन्नमुरव्या केपं तन्न सत्यं सत्यं पुनः सत्यं त्रिवाचा

कथयामासहे ६४ अश्वाधिकास्तवरित्तायेतेस्मिन्कथितातव एतद्दर्शनकस्या
पिनिश्चितंकथितंशिवे ६५ मासमेदिङ्गुनश्रीसंविंदुनिश्चयत्रवीस्महे अस्य
मंत्रस्यदेवेशिनैवन्यासंषडंगकेः ६६ नैवध्यानेमतस्तुदिग्प्राणप्रतिष्ठयानच
नकवचनचस्तोत्रनचहृदिग्वंधनादिकं ६७ सिद्धसाध्यसुसिद्धारिघटितार्थेनकिंच
चन नयेत्रपूजनंचैवपद्धत्यापटलादिकं ६८ सहस्त्रनामजपादिस्तवराजादि
कंनच नहोमानक्रियायस्य ऋष्यादिकल्पितंघनं ६९ तस्मात्घटितार्थेनैव
मुक्तत्वंसर्वदाप्रिये अतःपरंनिरुपमंनास्तिनास्तिकदाचन ७० संपूर्णा
हिश्रीरामंचस्वात्मारामोहृदेमम पंचाक्षरजपेत्सर्वेमध्यगमपदंस्मरेत् ७१
अतःपंचाक्षरजप्त्वाशिवेनसमतांव्रजेत् तत्पदंशिवरूपायत्वंपदंजी
वरूपिणे ७२ असिपदेनरामायतयोरैक्यनसंशयः एकोपिहेमकर्त्ता
रोजीरीकायापुननैवे ७३ ऋद्धिसिद्धिप्रदातारंब्रह्मज्ञानेविशेषतः।

९

कलाचतुष्टयंयुक्तंशिवसाक्षान्नसंशयः ७४ ज्ञात्वागुरुमुखाद्देवंब्रह्मैवे
वासौनसंशयः ७५ औषधीरसरसायनधातुवादेहैरावशिकरणागार
डिधातुवाद तालखड्गगुटिकांजनमंत्रवादसिद्धांतितेहरिशिवंचभवे
त्प्रसन्न ७६ इतिश्रीपद्मपुराणेब्रह्मरामसंवादेशिवपार्वतीहृदयस्यगु
ह्यनिरूपणानामतृतीयोध्यायः ३ विहंगंवाहनंयस्यत्रिकंचयस्यभू
षणं पालसाबाम्भभागस्यसदेवःशरणंमम १ परिक्षित्प्राकृश्रवणे
कीर्तनेनारदःशुकेः स्मरणेशिवप्रल्हादःलक्ष्मणापादसेवने २ श्रव
णेकीर्तनेध्यानेपृथुराजादिकेकृते वंदनेईशभक्तोरंदास्यंताहरेहनू
मतं ३ सख्यमर्जुनकर्तव्यंबलिचात्मनिवेदने भक्तिनवविधंहृ
ताकैवल्यंप्राप्यतेपरं ४ श्रवणंकीर्तनेविष्णोःस्मरणंपादसेवने अर्च
नंवंदनेदास्यंसख्यमात्मनिवेदने ५ वेदांतन्यायमीमांसातर्कवैशे

विकंतथा चार्वाकादीनि शास्त्राणि षट्दर्शनमपि स्मृतं कापालिकं च जैनं च जंगमं ब्राह्मणोंतथा संन्यासी च तथा सोपि षट्दर्शनमितिस्मृतं शैवा शाक्तातथा सौरा गाणापत्या सवैष्णवच ६ जैनं च वैष्णवं चैव षट्दर्शनमितिस्मृतं ७ हरस्तं पवित्रं यद्दिदानपुरायं पादं पवित्रं यद्दितीर्थयात्रा वाकं पवित्रं यद्दिरामनाम हृदि पवित्रं यद्दितार्थनिष्ठ ८ ज्ञानं विरागो नियमो यमश्च स्वाध्यायवर्णाश्रमधर्मकर्मः भक्तिः परं शम्भव शतानुभावो माहेश्वमार्जी प्रवदंतिसंतः ९ शैवा पाशुपता महाव्रतधरा कालामुखा जंगमा शाक्ता कौलकुलाकुलार्चनरताः कापालिका णांभवा १० यज्ञाकृत्यविशेषतंत्रनिरतास्ते तत्वतोवंचिता स्तेषामल्पफलं भवंतिसततं सत्यं न मोक्षं परं ११ चार्वाका श्वरताश्च धर्मनिपुणाः दृष्टान्तवादे रता नाना तर्कवितर्कभावसहिता निष्ठा परं ता किकाः १२ वेदार्थः प्रतिपादकास्सकुशला कर्तेतिनैयायिका स्तेषां स्वल्पफलं

भवंतिसततंसत्यंनमोक्षंपरं १३ कर्माकर्मविकर्मबोधजनकाकर्मार्थमीमांसकाः
सांख्यायोगपराः सदैवविदुषासंन्यासिनोस्नातकाः १४ योगांगाष्टसुबोधकाप्रतिभ
टपातंजलिन्यायका योगांगानिमिदंप्रबोधजनकंसत्यंनमोक्षंपरं १५ वेदांता
वउत्तर्ककर्कसमितिवाद्वैतसंबोधका नानावादविवादज्ञाननिपुणविज्ञानबो
धात्मकाः १६ कर्तारंप्रवदंतिचैवयवनापापेरतानिर्दया विप्रावेदरतासमत्वनि
रतासत्यंनमोक्षंपरं १७ स्वन्यार्थप्रतिपादकालघुगुरौबोधजनाश्रावकाः ना
नातीर्थविरोधकाश्रुतिपरास्यत्स्यर्थसंबोधकाः १८ चंडाचंडजल्पकमहामेदासबि तुड
दावैष्णवा सर्वैतेप्रपंतेतिदुःसहतरंसत्यंनमोक्षंपरं १९ प्राणापानविरोधनार्थ ५
निरतासंस्थाप्यवैशेषिकाः वायुःपूरककुंभकंप्रतिदिनंतद्रेचकंरुदका २० जिव्हादो
हनकर्मिकासुरसिकालंबापिनालंतिका योगांगानिनिभृथिकाचसततंसत्यंनमोक्षंप
रं २१ यंशैवंसमुपासतेशिवइतिब्रह्मेतिवेदांतिनोबौधाबोधइतिप्रमाणपटवः कर्ता

तिनैयायकाः २२ अर्हं नित्यध्यजैनसासनरताकर्मेतिमीमांसकाः सोयंनोविद्धातवां
छितफलंसत्यंनमोक्षंपरं २३ सौराःसूर्यमुपासनंचसततंशाक्तंचशक्तिंतथा गाणापत्य
परंगणेशभजनंविष्णुंभजेद्वैष्णवे २४ शैवानांशिवपूजनंपरमकंविप्रेचसर्वात्मकं॥
नानादैवतधांछिताथेवरदंसत्यंनमोक्षंपरं २५ नानादैवतचित्रवेशरचितानाना।
मतेध्यामकाः नानातीर्थनिसेवकाः जपपरामौनेस्थितानित्यशः २६ सर्वेचोरदयो
यकास्त्वभिमतावादेपवादेरताः ज्ञानंमोक्षपरंवदंतिमुनयः सोप्राप्यसादुर्लभाः २७
ज्ञानमात्रेणमुच्यंतेनानासाधनवर्जितं साक्षात्कारपरंज्ञानंप्राप्यतेगुरुराज्ञया २८
शम्वतानेद्शांतत्वेपूर्णरूपस्वस्वरूपके तुष्टत्वमचलत्वंचमंडेश्वर्यादिप्राप्यते २९
अवसिद्धोवाच जलस्नानेवहिःशुद्धिमंतः शुद्धिकथंभवेत योगिनांतत्कुतःस्ना
नेक्षपालुःकपिलोवद ३० कपिलोवाच वामनासापुटेइडादक्षिणपुटेपिंगला
गांधारीकर्णवामेचहस्तिनाकर्णदक्षिणे ३१ वामचक्षुसुखानाडीतंत्रुषाचक्षुदक्षिणे

सुषुम्णा मंगदा प्रोक्ता शंखिनी लिंगमिंद्रिया ३२ वारुणीमुत्रदारस्य सर्वांगे च यशस्वि
नी नाड्येकादशप्रोक्ता शरीरे च व्यवस्थितं ३३ व्यापितं दशद्वारे तु चराचरकरो
तियः इडा भागीरथी गंगा पिंगला यमुना नदी ३४ सुषुम्णा गंडुकी प्रोक्ता हस्तावे
रीसरस्वती कुहूश्च नर्मदा येन तापी च शंखिनी तथा ३५ गांधारी नाडिकावेरी वारु
णी गौतमी तथा ताम्रपर्णा सुखा नाडी सिंधुनदी च हस्तिनी ३६ गौतमी लंबुषा
चैव पूर्णा पूर्णा यशस्विनी इति नाडी नदी प्रोक्ता शरीरे वर्तते सदा ३७ पवनं चतुरी
यं च सर्वतस्नानमुच्यते गंगायमुनयोर्मध्ये बालरंडा तपस्विनी ३८ बलात्का
रेण गृह्णीयात्तद्विष्णोः परमं पदं जलस्नानमलः त्यागी भस्मस्नाने वहिः शुचिः
३९ अंतः शुचिर्मंत्रस्नाने ज्ञानस्नाने परं पदं अंतःस्नानविहीनस्य वहिःस्ना
नेन किं फलं ४० मलयाचलसंभूते नवेन चंदनायते मंत्रस्नानं मनो शुद्धिः
सच्चांतः शुद्धमाप्नुयात् ४१ अंतर्वहिश्च शुद्धार्थं ज्ञानस्नानं च मोक्षदं बट

वीजेपिस्तूह्मेपिमहावटत्तत्तयेथा ४२ यदस्तिसर्वंतुद्धाशिकुतोयायातितद्घटः
तथैवाभ्यंतरे शुद्धिः वहिः शुद्धोतिततद्दशात ४३ वीजवृक्षादिन्यायेन सर्वत्रैकंशु
चिर्भवेत नैकतत्वस्वरूपंचउत्पन्नंज्ञानमजसि ४४ अहंममेतिचाज्ञानंभ्रमंती
रूपभ्रमोयथा दुर्लभोविषयात्यागोदुर्लभंतत्वदर्शनं ४५ दुर्लभासहजावस्थासद्गु
रोकरुणांविना ४६ ऋषिसिद्धोवाच कथंभगवतोज्ञानंशुद्धमत्यंतजायते त
त्रोपायंमुनिर्ब्रूहिममानुग्रहतोयदि ४७ कपिलोवाच जाग्रत्स्वप्नसुषुप्ताद्विप्रपं
चोयत्प्रकाशते तद्ब्रह्माहमितिज्ञात्वासर्वबंधात्प्रमुच्यते ४८ त्रिषुधामसुयद्भो
ग्योभोक्ताभोगाश्चयद्भवेत तेभ्योविलक्षणः साक्षीचिन्मात्रोहंसदाशिवः ४९
एकोदेवःसर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्मा सर्वाध्यक्षोसर्वभूताधिवा
सोसाक्षीचेताकेवलोनिर्गुणश्च ५० पिंगलादाक्षणः सूर्यईडाचंद्रस्तुवाडशः अं
तः करणपंचैवप्राणांचपंचकंतथा ५१ विकारषडमिस्तेनदेहस्यात्मप्रवर्तते ६

त्पकं गुणासर्वेत्रकलाकाष्ठचतुष्टिकं ५२ इक्षुगुडशर्करेण श्रीगंधेनसवासितं ॥
क्षीरेण आज्यप्राप्तव्यंतिलेतैलंतथात्मन ५३ साधनेनविनाप्राप्तंगुरुवाक्येन
निश्चितं स्वात्मानंहृदिपद्मेसुप्रसन्नंज्योतिरूपकं ५४ प्रथमंतुशिरोपद्मंनेत्रप-
द्मंद्वितीयकं तृतीयंवदनंपद्मंमुखपद्मंचतुर्थकं ५५ पंचमंकरपद्मंचषष्ठं
चरणपंकजं सप्तमंनाभिपद्मस्थं अष्टमंहृदिपंकजं ५६ अष्टमपद्मात्परंपद्मं
सहस्रंहृदयपंकजं चक्रातीतेपरंस्थानेसूक्ष्ममोंकारसंज्ञितं ५७ हृत्पद्मंकर्णि-
कामध्येस्वच्छंविज्ञानमव्ययं अंगुष्ठमात्रममलंपश्येत्सैकांतमीश्वरं ५८ रात्रौ
चस्थलविश्रांतिमध्येदीपंचस्थापनं जोठहस्तप्रमाणेनतत्रैवाचावलोक-
यत ५९ अवलोकस्यदीपस्यमध्येनीलंचदृश्यते नीलमध्येतथापश्येद्बिंदि
तंमतमुत्तमं ६० तत्रैवपश्यतेयेननिमिषोन्मेषवर्जितं तदाद्दृष्टिस्थिरोभूत्वा
अंतर्लक्षंतदुच्यते ६१ अंतर्लक्षविहीनस्यबहिर्लक्षंनिरर्थकं लक्षालक्ष

द्वयोर्लीनंलक्षितस्यमहात्मनि ६२ यथावारिमरुद्भूतेनानाकारंविलोक्यते तथै
वकल्पनासंतु चिद्व्याप्निसमद्यते ६३ दृष्टिद्वयसमत्वेनगुरुनेत्रेचपश्यति।
ज्ञातव्यंततत्वकुर्यात् चित्तस्थिरमिदंभवेत् ६४ मौनःस्नानरतःफणिपवना।
भुक् मेवाल्पपर्णाशनो नैरासादपिचातकोप्रतिदिनंशेतेविलोमुषकाः ६५ भ
स्मोद्धूलितविग्रहोरवलुखरोध्यानानुरक्तोवको सर्वेषांफलमेवनास्तिसकले
ज्ञानेप्रधानंतपः ६६ भार्गीमानुष्यमौनंचत्रिषुलोकेषुदुर्लभं यःपठेत्सत
तंभक्त्यासमुक्तोभवसागरात् ६७ अव्यक्तंगंचचतुर्थाद्वंत्रिस्थानंपंचदैवतं ॐ
कारंयेनजानातिब्रह्माविष्णुशिवात्मकं ६८ ॐकारंपितृरूपेणगायत्रीमातरंत
था पितामातानजानातिसविप्रोनामगर्दभः ६९ इदंतीर्थमिदंतीर्थंभ्रमंतिता
पंसाजना आत्मतीर्थंनजानामिकथंमोक्षस्तपःश्रम ७० कायाकाशीपुरि
क्षेत्रे आत्माविश्वेश्वरोहरिः ज्ञानेभागीरथीगंगातत्रविश्रांतिमेमनः ७१

प्रातः प्रभृति सायांतं सायादि प्रातरंतिकं यत्करोमि जगन्नाथ तदस्तु तव पूजनं
७२ मनोचितं तुरंगाणां शरीरं रथमायते कालचक्रमयं यांति पूर्वकर्मानुसारा-
णी ७३ यद्दिने पतितं विंदु मातुर्गर्भे भुनिर्मितं तद्दिने लिखितं देव हानिर्मृत्युर्म-
खोत्तरं ७४ इति श्रीपद्मपुराणे सिद्धांतसारे कपिलऋषिसिद्धसंवादे राजराजेश्व-
रयोगो नाम चतुर्थोध्यायः ४ सूत उवाच प्रणम्य दंडवद्भूमौ स्तुत्वा चात्र चरित्र-
कं अर्चयित्वा पादपद्मं पुनः प्रश्नं करोति च १ चतुरासीतयाख्यातकष्टं कष्ट-
तरं महत् कदाचित्प्राप्यते मृत्युः पुनर्जन्म भवेद्ध्रुवं २ नानायोनिगतः पा-
श्चादुत्तरे नरजन्मनि नरो नारायणो भूत्वा कैवल्यं ब्रह्मशाश्वतं ३ राजराजेश्व-
रं योगं भाषितं च महेश्वरं लोकोपकारनार्थाय पार्वतिपतिबोधितं ४ भगवान्
बोधितः पार्थहिते कुदपरीतया आत्मबोधं च अस्माकं नित्यानित्यविवेकिन
५ तत्पदं त्वंपदाख्यातं असिपदं तु तृतीयकं विस्तरेण प्रबोधय त्वं यथार्थेह-

गोचरं ६ तदाहरतिसंतापं जन्मकोटिसहस्रकं निमिषार्धेनेप्यंचिंतामध्येजीवन्मु
क्तोभविष्यति ७ श्रीकपिलउवाच इदंब्रह्ममहाश्चर्यं श्रेष्ठाच्छ्रेष्ठतरं महत्
अनाधिकारिशिष्यस्य सर्वथानोपदेशयेत् ८ ऋषिसिद्धावाच सर्वेषाम
पिलोकानेकोवाज्ञानाधिकारकं वद तत्तरातत्सर्वं यथासंशयनाशनं ९
श्रीकपिलोवाच गुरुभक्तिरतोनित्यं सत्यवादी जितेंद्रियः विप्रश्चवेद
वक्ता च षडशास्त्रपरागताः १० नित्यानित्यविवेकित्वइहामत्र विवर्जि
ते तितिक्षोपरतिः शांतिर्मुमुक्षुत्वस्य लक्षणं ११ निरतः सर्वकर्माणि
वंनेसर्वेदेवता अटनेसर्वतीर्थानि फलंने छतिसर्वदा १२ कामक्रोधस्त
थालोभमोहमात्सर्यमेवच दंभाहंकारसंयुक्तोजाग्रत्स्वप्नेषुवर्जितः १३
निंदकोवंचकोधूर्तोपाखंडीनास्तिकः शठः मनसापिनवक्तव्यं गुह्याद्गु
ह्यकवचनः १४ शांतोदांतोक्षमाजीवसर्वेंद्रियसमन्वितः आसक्तोब्रह्म

ज्ञानेच्छुः सदा साधुसमागमः १५ संविशुद्धः सदाचारी मुमुक्षुः सर्वदेवताः श्र-
शापाश्च चैतैर्मुक्तो ह्येतेभ्यो ह्यधिकारिणः १६ अनेकजन्मसंस्कारात्
सद्गुरोः कृपया वसात् प्रत्यक्षं च परोक्षं च विवेकः प्राप्यते बुधैः १७ भिद्यते हृद-
यग्रंथिश्छिद्यते सर्वसंशयः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे १८
दृष्टांतरं प्रवक्ष्यामि सर्वसिद्धांतविस्तरं वेदांतेन प्रकाशेन तत्त्वमस्य च उत्तमं १९
गोपितं सर्वशास्त्राणां विस्तारं कथितं मया सर्वेषामधिकं तत्त्वं दृष्टांतरं च
दृश्यते २० अंतरंगस्य ज्ञानं च बहिरंगस्य पश्यति प्रत्यक्षं चैव दृश्यंते दृ-
ष्टांतरं प्रवर्तते २१ प्रथमं नादरूपं च बिंदुश्चैव तदा भवेत् तृतीयं च कला
प्रोक्ता ज्योतिरूपं तु पश्यति २२ अकारं नादरूपं च उकारं बिंदुरूपकं मका-
रं च कला प्रोक्ता ॐकारं ज्योतिरूपकं २३ नादश्चरैर्लुब्धसर्पे घंटानादं कुरं-
गवान् पतंगलुब्धते दीपं नादे न लुब्धते मनः २४ पतंगमीनहरिणा

गजाश्चलयतिक्रमे इंद्रियाणिमनुष्यस्य भ्रजंतिकिमुचित्तसः २५ यथा
चैवकपाषाणास्तुचवेगंयंघकस्तथा उभयोदर्शनेयोगेमोहितंतत्रलिष्यते २६
तथैवचमनुष्याणां आत्माचपृथगस्तथा मानसंतत्रलीयंतेइंद्रियैकस्य
चेष्टितं २७ तदर्हं आत्मभावेनमानसंलभतेसदाइंद्रियाणिस्थिरंयस्यतन्मा
नोउन्मनोभवेत् २८ घृतस्यप्रतिमांकृत्वाउष्णेनैवविलीयते लवणंजल
निक्षिप्तंलवणत्वाद्विलीयते २९ तथैवस्वात्मभावेनमनोन्मनप्रजायते ह
स्यतेचक्षुरग्रेणाचित्तंतत्रलयंगतः ३० शर्कराजलसंयुक्ताशर्करत्वाद्विग
च्छति सगुणांध्यायतेविप्रनिर्गुणंतत्रउच्यते ३१ फलस्यकारणंपुष्पं फलात्पु
ष्पविनश्यति ज्ञानस्यकारणंकर्मज्ञानात्कर्मविनश्यति ३२ पाणिचारयथान्या
यंजलंचपूरितंयथा ऊर्द्धछिद्रंतथैकंच अधछिद्रंदशास्मृतं ३३ ऊर्ध्वछिद्रंच
निःक्षेपेजलवद्धंतत्वमाश्रितं उक्तंचऊर्द्धछिद्रस्यरिक्तमांडंयथाभवेत् ३४ प्राप्ते

कालेचविप्रर्षेमनसाभयमाप्नुयात् तत्सर्वंकथयिष्यामिसावधानेनत्वंशृणु ३५
प्रथमेचभयस्त्रीणांपुरुषंरतिन्नृत्तनं अनंतरंसर्वलोकानांचित्तक्षिप्तंसर्वमंदि
रं ३६ पुरुषं अल्पसंपर्कोलभतेगतयातया पुरुषंनिर्भयंलज्जाक्लिष्टतास्तु
तदोच्यते ३७ पुरुषंवश्यंकृत्वाचगृहस्थीगृहमुच्यते तदामुक्तीनताप्रा
प्तंसर्वत्रसिद्धिकारिणी ३८ शरीरंभुवनांयस्यहृदयंरतिमंदिरं आत्माचपु
रुषःप्रोक्तोमनसाप्रकृतीस्तथा ३९ प्रथमंयेनविक्षिप्तंद्वितीयंगुरुतातथा
संश्लिष्टतांतृतीयंचचतुर्थंचप्रलीनता ४० आरंभेश्रवणांकृत्वामननंच
विचारणां नित्यंध्यापकमभ्याससाक्षात्कारंतदाभवेत् ४१ एवंक्रमेणबोध
ध्यंविचार्यंचपुनःपुनः अकस्माद्गुरुसंतुष्टेसाक्षात्कारंनुतत्स्मरणात् ४२ म
तिकेवभवेज्जांडंपुनमतिकयोस्तथा परब्रह्मरलोकासंसारेणानलिप्यते ४३ प
ठित्वावेदशास्त्राणांब्रह्मज्ञानेनवर्जितं तद्दृष्टाविषयवर्त्तंतेपठित्वाकिंप्रयोजनं ४४

पुस्तकं निपठंति ये नित्यं वाक्यं करोति च अप्रमेयं प्रशिक्षितं येन पठंति किं प्रयोजनं ४५
उदकेन भवेत्पंकं पंकमापेन शुद्धति मनः करोति यत्कर्म मनः शुद्धेन उच्य
ते ४६ मनः करोति कर्माणि मनो लिप्यति पातकैः मनः साक्षात्मनी भूत्वा न च
मैन च पातकैः ४७ कामनासहितं कर्म कर्त्ता च क्रियसिद्धये तदा सो लिप्यते भोगे
निष्कामो नैव लिप्यते ४८ कर्पासेन भवेद्वस्त्रं वस्त्रं कर्पास उच्यते आत्मत्वेन भ
वेज्जीवो जीवो ब्रह्म सराो उच्यते ४९ सतो गुणा भवेद्धर्म रजो प्रपंचमेव च तमो
गुणाद्भवेत्क्रोधं गुणात्रयमिदं भवेत् ५० एकं च मद्भांडमनेकरूपं गोक्षीरमेव कं ४
ऊवर्णा धेनुः सुवर्णमेकं वहुभूषणानि शरीरभिन्नं परमात्ममेकं ५१ पाषा
णामाला ये व ध्याहा देवपाषाणमेव च वृद्धि पंडित दैवस्य कुतस्याने च तिष्ठ
ति ५२ आत्मलिंगं च विहं च सदेहं तत्र वर्जितं सर्वभूतस्य रूपं च एकमे

वचपरपति ५३ स्वगेहे पायसं त्यक्त्वा भिक्षामिच्छति दुर्मति शिलामृदारुचि
५४ त्रे च देवताबुद्धिकल्पिता हृत्पद्मे परमं तत्वं आदिमध्यांतवर्जितं आधा
रं सर्वलोकानां अनाधारं च अव्ययं ५५ कंटकाग्रकृतं केन सिंहशार्दू
लविक्रमे मयूरे नृत्यकं केन ते चाचसहजोद्भवं ५६ भ्रमरीकीट
कीटस्य अन्यस्थानं प्रतिष्ठितं कीटकी तेन ध्यानेन साक्षात् भ्रम
रता भवेत् ५७ चक्षुरग्रे स्थितं नित्यं विस्फुरंति मणिस्तथा तद्वच्च रूपा
पकं देवं भवबंधाद्विमुच्यते ५८ चक्षुरग्रे स्थितं नित्यं छायासमायामू
लरूपिणी इच्छा इच्छाकरूपेण शिवसायुज्यकारिणी ५९ चक्षुरग्रे स्थितं गु
प्तं अंगुष्ठपर्वमात्रकं तदूर्ध्वं चापि पूर्वार्धे चाग्रे सूक्ष्मं च वक्रं ध्रुवं ६० चक्षु
र्दृष्टिसाक्षिभाजं अवलोकनतत्परं प्रकाशे च स्वयंज्योतिर्न च स्तत्रैव

परपपति ६१ अचलं निर्मलं सांतं कायस्यं तेजउच्यते अमलं निर्मलं दे
हं सून्यं व्यापिनिरंजनं ६२ शुद्ध स्फटिक संकाशं मणिवर्णस्तु शुभ्रा
ता तेजोरासि परं ब्रह्म घार्यं तत्परात्लिंगके ६३ सर्वांगे सच्चिदात्मा
न ज्ञान चक्षु निरीक्षणं अज्ञानी येन लक्षंति भास्वरं भानुमप्यवत ६४
सुवर्णं दीपितो दीप्तां ज्ञानाग्निपरदीपितं जीवः सर्वमलान्मुक्तो स्व
स्थियदीप्यते स्वयं वहिरंतस्फुरेज्योतिरन्नकुंभप्रदीपवत् स्वप्रकाशस
दैवैकं रूपात्मकमनामयं गुह्याद्गुह्यतरं गुह्यं चक्षुस्थाने प्रतिष्ठति त
न्मूर्तिलक्षते द्रष्टि आपाद तल मस्तके ६७ मनसा भावयेन्मूर्तिं चक्षुषा
प्रणीते जसं तन्मूर्तिं चक्षुरग्रे भूति ष्टते नात्र संशयः ६८ इति श्रीपद्म
पुराणे सिद्धांतश्लोक प्रसिद्ध ऋषिसंवादे राजराजेश्वर योगो नाम पंचमो

ते

ध्यायः ५ ऋषिसिद्धोवाच सिद्धानांचैवसर्वेषांप्रणम्यकपिलोमुनिः योगसिद्धामहा
श्रेष्ठाज्ञानंज्ञेयंचब्रूहिमे ६९ कपिलोवाच शृणुत्वंऋषिसिद्धानांयदर्थमिहमागताः॥
तत्सर्वंसंप्रवक्ष्यामिविशेषममलंतवः॥७० प्रणम्यशंकरंदेवंपरात्परमईश्वरं॥
आत्मानंचप्रकाशेनप्रत्यक्षंतत्वमच्यते॥७१॥बहिर्गतस्यशिष्यस्यआगतःशीघ्रमं
दिरं॥प्रवेशामध्यमवनंचक्षुश्चैवनपश्यति॥७२॥तत्रैवस्थिरतोस्थित्वाअंधकारं
प्रभामवेत्॥तदेवदृश्यतेयस्कस्वयंचक्षुश्चपश्यति॥७३ आज्ञानंचहृदीयस्यअंध
कारंचमानसं॥अहर्निशंप्रवेशंतिचंचलत्वेववस्तुना॥७४॥पश्यंपतिस्थिरत्निश्चै
वपदार्थसर्वंदृश्यते॥हृदयंअंधमवनंदृश्यतेचनिरंतरं॥७५॥अकल्पितोऽदेवं ७
ज्योतिःहृदयंचप्रकाशितः॥निर्मलंश्चैवमनसंज्योतिरूपंप्रकाशितं॥७६॥ध्याया
चदृश्यतेज्योतिपरंज्योतिप्रकाशिता॥अकल्पेदृश्यतेज्योतिस्तज्ज्योतिपरमात्म

नि ॥७७॥ आनंदकंदसंभूते ज्ञानेनीलसुशोभिते ॥ आहिमेनरकाघोरादिव्यज्यो
तिर्नमोस्तु ते ॥७८॥ विचार्योष्टदलोपेतं वैराग्यकेसरं तदा ॥ विरक्तकर्णिकायु
क्तं चंद्रकांतिसमप्रभं ॥७९॥ सच्चिदंपशुपते रूपं परंब्रह्मेव भाषितं ॥ हृत्पुंडरीक
मध्ये तु सोमसूर्याग्निमंडले ॥८०॥ विद्युल्लेखेव च कल्याणी ज्वलिता वह्निरूपिणं
शिवं दृष्ट्वा तथा नित्यं पक्षाणं पश्येयथाविधि ८१ चूतवृक्षो यथा पश्येत्फलं च वक्
ट कोमलं ८२॥ फलं कोमलं च तथा आम्लं आम्लं च मधुरं तथा ॥ ८२ एतेः कर्णं
चूतवृक्षे मानसं ख्यातथा फलं फलं कोमलं निर्दिष्टं कटुरामलमेवतथा मनस्थि
रं च आम्लं च यदा फलं तदा ॥८३॥ मधुरं ब्रह्मसंप्रोक्तं रसं हंसेन सेवितं ॥ अहो वा
सनया बद्धमुक्ता निर्वासनेमनः ॥८४॥ तस्मिन्निर्वासने भावब्रह्म[illegible]रसं पिबेद्बुधः ॥ [illegible]
ब्रह्मरसमिदं स्वादं तृप्तं च परमात्मनि ॥८५॥ इंद्रस्य मन्यते क्षुद्रं काकथान्येपःकी

टकैः विचारदर्पणीयस्य अवलोकनेन च मानसे ८६ दृश्यते तत्स्वरूपं च तत्रैव
पृथक् न हि हृदयं दर्पणीयस्य मनस्तत्रावलोकयेत् ८७ दृश्यते प्रतिबिंबे
ने आत्मस्वरूपं च निश्चितं आत्मतत्वं ज्योतिरूपेण दृश्यते च निरंतरं ८८ चित्तवृ
त्तिः स्थिरो भूत्वा हृदयं भानुरूपं स्वते आत्मनि स्फुरच्चैतन्यं स्वरूपेण स्वतेवि
भुः ८९ निर्विकारः स्वयंज्योतिः स्वभावार्कप्रकाशयेत् आशाशेतिष्ठते सूर्यो
गगने चंद्रभासते ९० स्वं स्वभ्यवसने तारापि व्योमे ज्योतिसंस्थितं दृश्यते तु
दिवाकारं तदाकारं विचिंतयेत् ९१ आत्मस्वभावप्रकाशं च न किंचिदपि चिंत
येत् तज्ज्योति हृदयस्थाने प्रत्यक्षं दृष्टिगोचरं ९२ पद्मगर्भे च दृश्यंते समुक्तो
नात्र संशयः ९३ ऋषय ऊचुः भगवन् यत्त्वया प्रोक्तं तं तथा व्यवस्थितं प्रभो ॥
तज्ज्योति हृत्स्वरूपं च स्वशास्वतं ब्रह्मकेवलं हृत्पद्मे च स्थितं ब्रह्मतत्वात्परे हवि

गोचरं कुत्रास्ति हृदिपद्मे च कथं ज्योतिश्च दृश्यते तत्सर्वं च वदास्माकं इदं हृ
दयपंकजं तन्मध्ये स्यात् ज्योतिश्च तत्त्वर्शय महामुने ९४ कपिलोवाच पा
दादिजानुपर्यंतं च पृथ्वीस्थानप्रतिष्ठितं तत्रास्ति पद्ममेकं च सर्वदेहेषु संस्थितं ९५
जान्वादिनाभिपर्यंतं स्थानमाप्येति कथ्यते आधारं लिंगनाभौ च वेदशास्त्रादि
संज्ञितं ९६ दलेषु दलवर्णेषु वासवत्सु फलेषु च त्रिस्थाने पद्ममेकं स्त्रीशिष्ट
तदूर्ध्वं प्रशंसति ९७ नाभ्यादिकंठपर्यंतं अग्निस्थाने सुशोभितं तन्मध्ये पद्म ते५
वि मेकं च हृदिस्थले सुसंज्ञितं ९८ दले द्वादशवर्णेषु व्यक्तमक्षरमव्ययं ककारादि
ठकारांतं वर्तते सर्वदेहिनां ९९ तत्कंठादिभ्रूपर्यंतं वायुस्थानमितिस्मृतं ता
लुमूले स्थितं पद्मं दले षोडशकर्णिके १०० स्वरान् षोडशकं तत्रं तदूर्ध्वं हृदि स
द्मकं साहृदिपद्मसंस्थं च चक्रारव्ये सुशोभितं १ साहृदि हृदमितपाङः स

॥१८॥ वेदशास्त्रेषु संमतः अन्यथा हृदिकं नाम स्थूलबुद्धिविवर्जयेत् २ रक्तं श्वेतं तथा कृ
ष्णं नीलपीतादिशोभनं तन्मध्ये व्यापितं येन तज्ज्योतिर्ब्रह्म केवलं सर्वस्यास्य
शिवो विष्णुः सोऽक्षरः परमः स्वराट् ॥ तत्रस्थं क्रीडितं येन सर्वेंद्रियसमुद्भवं ॥४॥
भ्रुवादिवक्त्ररंध्रांते आकाशस्थानसंज्ञितं ॥ सहस्रदलसंख्याकं पद्ममेकं वि
राजितं ॥५॥ सुषुप्तिकालसंप्राप्ते आत्मा सोऽपि समास्थितः ॥ यथा भानुप्रभा स
र्वैस्तथा देहेषु चेष्टितं ॥६॥ भ्रुवोः स्थाने रंध्रोपद्मं द्विदलं तत्र शोभितं ॥ हंसम
ध्येति संयुक्तं वर्तते वायुमंडले ॥७॥ तन्मध्ये आत्मज्योतिं च बिंदुरूपं विराजितं ॥
निवारशूकवत्तन्वी पीता च भास्करोपमा ॥८॥ तस्याः शिखायाम् मध्ये च परमा ॥१९॥
त्मा व्यवस्थितः ॥ गुरुमुखेन ज्ञातव्यं अन्यथा नोपलभ्यते ॥९॥ अनेकजन्मसं
स्कारात् सद्गुरोः सेवितैर्बुधैः ॥ संतुष्टः श्रीगुरुर्देवः स्वात्मरूपं प्रदर्शयेत् ॥१०॥ को

रिसूर्यप्रतीकाशंचंद्रकोटिसुशीतलं॥ यथोक्तवेदशास्त्रेषु तथापरंपतिधीमतः
११॥ आत्मज्योतिःप्रभावेन सोमसूर्याग्निभासते॥ अंतर्बहिश्चतत्सर्वं व्याप्यतेसकलं
जगत्॥१२॥ सततंहृद्यंशून्यपरूपंसहस्रदलमध्यगं॥ अर्द्धमात्रासविज्ञेयंप्रणवेनच
पूरितं॥१३॥ व्याहृत्यादिक्रियासर्वेहृत्पद्मेषुचवर्तते॥ मुख्यस्थानेमिदंज्ञात्वा आ
त्मतत्रैवतिष्ठति॥१४॥ आत्मदर्शनमात्रेणजीवन्मुक्तोनसंशयः॥ तस्मात्सर्वप्रय
त्नेनकर्तव्यंचात्मदर्शनं॥१५॥ सूतउवाच इत्युक्ताकपिलोश्रेष्ठाकृतार्थोऋषिसि
द्धयः॥ सर्वपापविनिर्मुक्तोआत्मरूपेणसंस्थितं॥१५॥ इतिश्रीपद्मपुराणेकपि
लगीतायांसिद्धकपिलसंवादेआत्मनिर्दर्शनकथनंनामषष्ठोध्यायः॥६॥ ऋषि
सिद्धोवाच॥ हृदिपद्मेस्थितंब्रह्मविस्तारंकथ्यतेमम॥ शरीरंवदसंरभ्यावेवद्धात्व
मितिप्रश्नो॥ कपिलोवाच॥ आपादमूर्द्धपर्यंतंमूर्तिरूपंप्रदृश्यते॥ प्रकारमात्रकातत्र

।२०। ताम्रवर्णे सशोभिते ॥१६॥ सर्वेंद्रियादिव्यापारं कुर्वेंदेहितथैव च विश्वाभिमानि
संप्रोक्तं रजोगुण समाश्रितं ॥१७॥ भूमितत्वं दृश्यरूपं स्थूलभोगस्तथैव च ॥ विपरी
तं ज्ञानसंयुक्तं वाचा वैखरि मेव च ॥१८॥ प्रमाणं हस्तसंख्या च सार्द्धत्रयमिदं स्मृ
तं ॥ अवस्था जागरा देवनेत्रस्थाने प्रशस्यते ॥१९॥ पंचभूतमिदं देहं पंचविंशति त
त्वकं ॥ प्रत्येकं भूतमेकं च शृणु सिद्ध महामुने ॥२०॥ उत्पत्ति जागर बोधो व्याहृतिश्च
चतुर्थकं कला चतुष्टयं यांति जाग्रतीत्वभिधीयते ॥२१ लोभ क्रोध स्तथा काम मो
हो भय तथैव च आकाशभागः संप्रोक्तं ज्ञातव्यं च मनीषिणः २२ प्रसारणं च चांच ॥२०॥
लनं आपगमनमेव च भ्रमनं कुंचनं पंचवायुभागामिति स्मृतं २३ निद्रा वर
ति भोजनं दृघात स्मास्तथैव च आलस्यं तेजसो भागस्थूलं पंच प्रशस्यते २४
श्लेष्ममूत्रं तथा रक्तं मज्जा मेदस्तु पंचमं आपो भागस्तु भो विप्र गुणपंचप्र

कीर्तिता २६ रोमत्वचामांसनाडी अस्थी चपंचकस्मृतः पृथ्वीभागस्तु विज्ञेयं पंच
भागस्तु दीर्यते २७ इदं पंचगुणाख्यातं यथाभागं तथा गुणं॥ प्रत्येकं पंचभूतेषु
ज्ञातव्यं च मनीषिणः॥२८॥ इत्येतद्विस्तरे स्थूलेन वरूपाणितारकं॥ व्यापितं
सर्वदेहस्य दृश्यते चर्मचक्षुषा॥२९॥ अथ सूक्ष्मशरीराख्यं वर्णव्यक्तिस्तथैव
च॥ स्थानं कर्मक्रिया सर्वे स्वरूपाचिंतेनत्वं श्रुणु ३० अपंचीकृतभूतेभ्यो लिंगदे
हे तदोच्यते॥ स्थानं कंठप्रदेशं च गुणसत्वप्रजायते॥३१॥ उकारमात्रिका तत्वस
भावस्याभिधीयते॥ अन्यथाज्ञानसंप्राप्तेः आपस्तत्वप्रजायते॥३२॥ शुक्लवर्ण
दृष्टिरूपं वाचेति मध्यमा स्मृता॥ यजुर्वेदं सविज्ञेयं मनोवैकारिकं स्मृतं॥३३॥
वपुरंगुष्ठमात्रं च साभिमानी स्तु तैजसो अविविक्तं च भोगाख्यं शरीरं सूक्ष्मकं स्मृतं ३४
साहस्यं च अनाहस्यं साहस्यं नाहस्यं तथा मनोवैकारिकं सर्वं स्वप्नावस्था च तु

२१ ध्येयं ३५ अंतःकरणमनोबुद्धिचित्तमहंकारमेवच भागमाकाशविज्ञेयंपंचमा
गप्रकीर्तितः ३६ व्यानःसमानोदानंचप्राणापानस्तथैवच एतेपंचकवि
ज्ञेयंवायुभागस्तदोच्यते ३७ श्रोत्रंत्वक्चक्षुजिह्वाचघ्राणंपंचकमेवच
तेजोभागःसविज्ञेयस्सूक्ष्मदेहवृतिष्ठति ३८ वाचापाणिशिश्नपादगुदेति
पंचकंस्मृतं॥आपःपंचकसंज्ञेयआपोभागःप्रशस्यते॥३९॥शब्दस्पर्शंचरूपंचरस
गंधस्तथैवच॥शवंपंचकपृथ्वीषुपृथ्वीभागःप्रशस्यते॥४०॥तत्वंपंचकपंचैतेशरीरं
लिंगसंज्ञकं॥स्थानःकंदप्रदेशंचतन्तूसूक्ष्मतरंस्मृतं॥४१॥स्थूलदेहस्यमध्यस्थं
श्वेतवर्णविराजितं॥तन्मध्येक्रीडितोजीवस्तहृद्ईहृदिसंज्ञिकं॥४२॥शरीरंका
रणंप्रोक्तंपंचविंशतितत्वकं॥गुणरूपंतथावर्णस्थानंकर्मचदैवतं॥४३॥तत्स २१
र्वंकथयिष्यामिस्वस्थचित्तेनत्वंशृणु कारणंहृदिसंस्थानेतमोगुणसमुद्भवं४४